# Virakti Ratnavali

# વિરક્તિરત્નાવલિઃ

## Document Information

Text title : Virakti Ratnavali

File name : viraktiratnAvaliH.itx

Category : shiva

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 38 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# વિરક્તિરત્નાવલિઃ

ૐ શ્રીગણેશાય નમઃ ।

પ્રણમ્ય ગુરુચિદ્ઘનં નતતમસ્તતિધ્વંસનં
    સુખામ્બુરસવૃષ્ટિદં સુકૃતિનાં હૃદબ્જે સદામ્ ।
કરોમિ ચિતિવૃદ્ધયે જનિવિમુક્તયે જ્ઞાનિનાં
    ત્રયીહૃદયસાગરોદ્ભવવિરક્તિરત્નાવલિમ્ ॥ ૧॥

અપારભવસાગરં ચતુરશીતિલક્ષોદ્ભવ-
    સ્થલોર્મિચલિતં સતીસુતસુતાદિનક્રાચિતમ્ ।
મહેશ્વરપદામ્બુજપ્રણયકર્ણધારેરિતં
    ન તર્તુમલમન્યતો દૃઢવિરક્તિપોતં વિના ॥ ૨॥

ન રજ્યતિ તુ ધાવકાન્ મલિનમીષદપ્યમ્બરં
    તથા સકલવાસનામલિનમાનસં સંવિદા ।
ન તિષ્ઠતિ યથા રજઃ પરમસૂક્ષ્મસૂચ્યગ્રકે
    સરાગહૃદયે નૃણાં શિવસુખાબ્ધિબિન્દોઃ કણઃ ॥ ૩॥

વિનાશયતિ શમ્બરં નિજકણાંશસંસ્પર્શતો
    વિપક્વકલશં સકૃચ્છ્રવણતોઽપિ બોધસ્તથા ।
સકામપુરુષં પરં વિગતકામચિત્તે સદા
    તથા નટતિ ચેતના સુરસરોવરે હંસિકા ॥ ૪॥

વિરક્તહૃદયં તથા વિશતિ સંવિદમ્ભો યથા
    સુનિમ્નતરભૂતલં ગલિતવાસના ધીર્નૃણામ્ ।
વિપક્ષવિહગો યથા વસતિ વૃક્ષનીડે નિજે
    તથા શિવસુરદ્રુમે પરમસૌખ્યસામ્રાજ્યદે ॥ ૫॥

મહાવિબુધસઙ્ગિનામમૃતલાલસાનાં સદા-
    શિવાઙ્ઘ્રિકમલાર્ચને નિયતમાનસાનાં સદા ।
યથા વિમલચન્દ્રિકા હિમકરસ્ય રાકાતિથૌ

તથા સુકૃતશાલિનાં કિલ વિરક્તિરુત્પદ્યતે ॥ ૬॥

તૃણીકૃતપિતામહત્રિદશનાથસમ્પચ્ચયા
સદા સ્ફુરતિ માનસે સકલસમ્પદા પૂરિતે ।
પુનશ્ચ વિષયે સ્પૃહા ભવતિ નૈવ પાતે યથા
વિરક્તિરિતિ વર્ણ્યતે મુનિવરૈશ્ચ સા સૌખ્યદા ॥ ૭॥

જડાજડમયે જગત્યસહનીયદુઃખાસ્પદે
યથોપલમરુસ્થલે ન લભતે પયઃશીકરમ્ ।
કિરાતહૃદયે દયાં મધુરસં કિરાતે જન-
સ્તથા સુખકણં વૃથાભ્રમણમાત્રમેવ ધ્રુવમ્ ॥ ૮॥

અનઙ્ગપરદમ્પતીમથનજાતશુક્લાર્તવે
યુતે ભવત એકધા વિશતિ તત્ર ગર્ભાશયે ।
તદૈવ નરદેહભાક્ સુકૃતદુઃખભોગાય વૈ
સ્વકર્મવશગો રજોદ્રવવિવૃદ્ધપેશીગતઃ ॥ ૯॥

તદાશયગતં ક્રમાત્ કલલભૂતરેતોરજો
જરાયુપરિવેષ્ટિતં મલજલાલયાન્ત્રાન્તરમ્ ।
ન માતૃજઠરાનલઃ પચતિ શાલિબીજાદિવત્
તતોઽઙ્ગમભિજાયતે વિહિતભોજ્યશીલૈઃ સ્ત્રિયાઃ ॥ ૧૦॥

શિરોનયનનાસિકાશ્રવણબાહુવક્ષઃસ્થલં
હ્યધોમુખહૃદમ્બુજં ભવતિ ગર્ભપિણ્ડસ્ય ચ ।
સ્વમાતૃરસધાતુગપ્રકૃતિવર્ણતેજોબલા-
ન્યધોમુખવિલાસવદ્વિમલદર્પણે પશ્યતઃ ॥ ૧૧॥

સ્વપાપફલભોગભાગ્ બધિરમૂકપઙ્ગ્વાદિકાં
સ તુ પ્રલભતે મરુદ્વિકૃતવક્ત્રનેત્રાદિકામ્ ।
સ્વપાકપરિપાકિકાવિમલમૃત્તિકાસ્ફોટક-
પ્રદીર્ણસુષિરાન્વિતાં ઘટતનું તથા પૂરુષઃ ॥ ૧૨॥

સ્વમાતૃજઠરસ્થિતઃ કફગલે પરોધાચ્છિશુ-
ર્ન રોદિતિ સુખં તથા ન લભતેઽગ્નિતાપાન્મલમ્ ।
વિમુઞ્ચતિ ન કુમ્ભકાદ્વહતિ વેગજાલં ચ નો
ભજન્નરકયાતનાં કૃમિરિવાત્ર મધ્યસ્થિતઃ ॥ ૧૩॥

ચસાકફપરિપ્લુતો જનનમાર્ગતોઽધોમુખઃ
    પ્રસૂતિસમયે શિશુઃ પતતિ વાયુના દૈવતઃ ।
તદા કુશલકામિની નિજકરેણ પાદૌ શિશોઃ
    પ્રગૃહ્ય કુરુતે તતઃ કફવિશોધનં ધૂન્વતી ॥ ૧૪॥

કટ્ષ્ણરસસેવનાદ્ વસનકમ્બલાચ્છાદનાત્
    પુરીષજલલોલનાનુચિતગન્ધસંસેવનાત્ ।
ક્ષુધાદિપરિપીડનાદવશમાનસાદીન્દ્રિય-
    સ્તતઃ શિશુદશાં કથં પરમપૂરુષઃ કાઙ્ક્ષતિ ॥ ૧૫॥

મમેદમિતિ વાસનાગૃહશરીરતાતપ્રસૂ-
    જનદ્રવિણભૂષણામ્બરધરાદિપશ્વાદિકમ્ ।
ન ચાસ્તિ કુલગોત્રસૂત્રનરજાતિવર્ણાશ્રમાઃ
    શિશોઃ ક ઇહ વેત્તિ નાહમિતિ વૃત્તિશૂન્યો યથા ॥ ૧૬॥

પયોધરપયઃ શિશુઃ પિબતિ રૌતિ વક્ષોરુહે
    નિજાનનગતે તતઃ કરપદં ધુનાત્યઞ્જસા ।
અધઃ પતતિ મઞ્ચકાદ્ વમતિ તં કફં ખાદતિ
    પ્રમૂઢહૃદયઃ સુખં વિષયજં ન વિન્દત્યહો ॥ ૧૭॥

પરિભ્રમતિ વક્ષસા પશુવદર્ભકો મન્દિરે
    ક્વચિત્ ખલતિ રોદિતિ ક્વ નુ ગતેતિ માતા ભૃશમ્ ।
કૃમિં ધરતિ પાણિના ચલતિ જાનુના ચાસકૃ-
    જ્જલં પિબતિ તાડ્યતે ગદભયેન માત્રા તદા ॥ ૧૮॥

દ્વિજોદ્ભવગદાત્ તદા શ્રવણવેધતોઽભ્યઙ્ગતો
    ભૃશોષ્ણજલસેચનાદુરગપૂતનાપીડનાત્ ।
અતિત્વરિતગર્ભભૃત્કુજનનીસ્તનાસ્પર્શનાદ્
    વ્યથા ભવતિ તાં પુનઃ સ્મરતિ કઃ પુમાન્ હા શિશોઃ ॥ ૧૯॥

પ્રિયૈઃ સતતખેલને પ્રહરતિ સ્વમાતા ગૃહે
    બહિઃ પ્રિયજનૈઃ સદા બલપરીક્ષયા મર્દ્યતે ।
ગુરુઃ પઠનમન્દિરેઽક્ષરવિધૌ પરં શિક્ષતે
    પ્રપઞ્ચહૃદયં વટું પિતૃજનાશ્ચ કૌમારકે ॥ ૨૦॥

અહો જગતિ યૌવનં નયતિ દેહિનં સર્વદા
    સકર્ણવચનેક્ષણં બધિરમૂકજન્માન્ધતામ્ ।

શ્રુતિશ્રવણશઙ્કરસ્મરણમૂર્તિસન્દર્શને
    ભવાર્ણવસુતારણપ્લવપદાબ્જભૃદ્દેશિકે ॥ ૨૧॥

પ્રભુઃ પરમયૌવનં વિષયયાચકેભ્યો યતો
    હૃષીકધનસઙ્ઘમર્પયતિ કર્ણભૂપો યથા ।
વિવેકરિપુમઞ્જસા દહતિ કોપશસ્ત્રાગ્નિના
    સદાઘકરમાદરાદ્વિટપતેશ્ચ ગૃહ્ણાત્યહો ॥ ૨૨॥

અભૂચ્છતમખઃ સ્વયં સમદ્ધયૌવનં યોષિતઃ
    શરીરવરવેદિકાકલિતયોનિકુણ્ડે ભૃશમ્ ।
જુહોતિ નરશુક્લકં વદનનન્દને ક્રીડતિ
    પ્રિયાધરસુધાં સદા પિબતિ કામયાનોઽનિશમ્ ॥ ૨૩॥

ન યૌવનવને ચર પ્રબલમારભિલ્લાશ્રયે
    સ કામહતકઃ સ્ત્રિયાઃ સુનિશિતૈઃ કટાક્ષેષુભિઃ ।
પ્રહૃત્ય કરલાઘવાત્ ત્વરિતમવ્રણં પ્રક્ષિપેત્
    કુચાદ્રિયુગલાન્તરે ત્વમપિ તૃષ્ણયા મુહ્યસિ ॥ ૨૪॥

ન યૌવનસુરાં પિબ દ્રવિણભીતિલજ્જાપહાં
    સ્વજાતિકુલશીલવિસ્મરણકારિણીં મોહિનીમ્ ।
પરસ્વયુવતીસતીગતિવિવેકહાનિપ્રદાં
    કુમાર્ગગતિદાયિનીં નિગમમાર્ગસરોધિનીમ્ ॥ ૨૫॥

પરસ્પરમતિપ્રિયં પરમયૌવને યદ્વ્યો-
    ર્વિરૂપમપિ મોહતઃ કિલ શરીરમાસીત્ પુરા ।
તદપ્રિયમહો ભવત્યથ શરીરિણોઃ પશ્યતોઃ
    સુરૂપમપિ વાર્ધકે વિમલચેલભૂષાન્વિતમ્ ॥ ૨૬॥

જરાશિથિલદેહિનો ભુવિ સુખં કુતો વિદ્યતે
    પ્રમુઢહૃદયેન્દ્રિયો ભવતિ તન્ત્ર સર્વા સ્પૃહા ।
પદં સ્ખલતિ વૈ ગતૌ કટિતટં ન તત્ પૂર્વવ-
    ચ્છિરશ્ચલતિ વેપતે કરયુગં મનો ભ્રામ્યતિ ॥ ૨૭॥

સ્વપુત્રરમણીસુતા વિષમવાક્યશૂલેન તં
    કુતસ્તવ ધનં વદ ક્વ નુ ચ કર્મ સમ્પાદિતમ્ ।
ઇતિ પ્રિયજનાઃ સદા પરિતુદન્તિ વૃદ્ધં તદા -
    પ્યહો સ પરિખિન્નધીઃ શિવશિવેતિ નાક્રોશતિ ॥ ૨૮॥

પ્રયાન્તમપિ મન્દિરાત્ પરુષવાક્યનિર્ભત્સિતં
    કુચેલમતિવાર્ધકં વિધૃતદણ્ડહસ્તં નરમ્ ।
ક્વ તાત પરિગચ્છસીત્યપહસન્તિ નપ્ત્રાદયઃ
    પુનશ્ચ પરિવેષ્ટિતા અપહરન્તિ તસ્યાંશુકે ॥ ૨૯॥

ક્વ મે નગરકમ્બલં ક્વ ચ ગતં કલિઙ્ગાંશુકં
    સુમૃન્મયઘટઃ પ્રિયે મૃદુલતાર્ણશય્યા પરા ।
મહાનિશિ ગૃહેશ્વરિ સ્વપિષિ ચોરકાલે કથં
    પ્રજલ્પતિ જરાન્વિતો ન લભતેઽપિ નિદ્રાસુખમ્ ॥ ૩૦॥

ચતુર્ષ્વપિ દશાન્તરેષ્વહહ ભૂપતિર્માનવઃ
    સુખં ન લભતે સદા પરવશો યતઃ સેન્દ્રિયઃ ।
સ્વમાતૃપિતૃવર્જિતો ભવતિ તત્ર બાલ્યેઽર્ભકઃ
    સદોપજનનીજનૈઃ સ પરિપોષ્યતે સેવકૈઃ ॥ ૩૧॥

સદા વિપદહો સુખં કથમસજ્જનો મન્યતે
    નૃપેન્દ્રતનયસ્ય સમ્ભવતિ યચ્ચ કૌમારકે ।
ગજાશ્વરથવાહનભ્રમણચાલનારોહણે
    મહાસ્ત્રશરચાપશિક્ષણવિધૌ ગદાયોધને ॥ ૩૨॥

સદા નગરપાલને પ્રકૃતિરઞ્જને ધ્વંસને
    દ્વિષાં કુમતિશિક્ષણે લુકૃતિલોકસંરક્ષણે ।
સુકીર્તિધનપોષણે નિજસુહૃજ્જનાલાપને
    કુતો નિહિતચેતસો નરમણેઃ સુખં યૌવને ॥ ૩૩॥

નૃપોઽહમિતિ ગર્વિતો વિધિનિષેધવર્જ્યો ભવ-
    ત્યમાર્ગગમનાત્ સદા દુરિતકણ્ટકાવિદ્ધપાત્ ।
શશાઙ્કમુખસુન્દરીવરતરક્ષુપઙ્ક્તયાં પુન-
    ર્ન યાતિ હૃદયાંશુકં નરપતેર્વિલગ્નં પરમ્ ॥ ૩૪॥

ભયં દ્વિજકુલોદ્ભવે ભવતિ સર્વદા દેહિનઃ
    શ્રુતિસ્મૃતિવિચારણે યજનયાજને પાઠને ।
સ્વરાક્ષરવિલોપતો દુરવગાહવેદાર્થતો
    યથાવિધિજપાર્ચનાવ્રતવિલોપતઃ કાલતઃ ॥ ૩૫॥

વણિક્કુલજદેહિનઃ ક્વ સુખમર્થકામસ્ય હા

પરાર્થચયરક્ષણે કલિતકાલહીનકો ।
મહીપતિમહાભયે પરપણીયલાભક્ષયે
સદા નિહિતચેતસઃ કૃષિપરિશ્રમે ગોક્ષયે ॥ ૩૬॥

ત્રિવર્ણજનસેવકઃ સવિનયઃ પદાદુદ્ભવો
વિધેર્ભવતિ સર્વદા પરવશઃ સ ભુઙ્ક્તે કદા ।
અનેકપરિચર્યયા શિથિલગાત્રસર્વેન્દ્રિયઃ
કદા સ્વપિતિ માનવઃ કથમસૌ વિરક્તિં ભજેત્ ॥ ૩૭॥

કુતઃ સુખમથ સ્ત્રિયા ભવતિ તત્ર કૌમારકે
સ્વજાતિકુલશીલરૂપમતિતુલ્યભર્તા મયા ।
કદા ક્વ કિલ લભ્યતે સકલભૂષણાલઙ્કૃતા
ભવામિ કથમેવમાદિશતચિન્તયાવેષ્ટિતે ॥ ૩૮॥

સદા મૃદુલભાષણે શ્વશુરસેવને યૌવને
સ્વભર્તૃપરિતોષણે ગૃહપદાર્થસંરક્ષણે ।
સુપાકકરણે પરં સુપરિવેષણે પ્રેરણે
સદાર્પિતદૃશઃ સુખં પતિગૃહે રમણ્યાઃ કુતઃ ॥ ૩૯॥

મુહુર્ભયમહો સ્ત્રિયાઃ પતિવિરોધગર્ભાચ્યુતેઃ
પ્રજાસુ બહુલત્વતો જનનતઃ સપત્ન્યાઃ શિશોઃ ।
મૃતેઃ પ્રસવતો ધવાત્યયવિયોગદારિદ્ર્યતઃ
સ્નુષાતનયયોગતોઽપ્યનનુકૂલજામાતૃતઃ ॥ ૪૦॥

વિરૂપવિગુણસ્ત્રિયા રમણસમ્પ્રસાદો ન વૈ
જનાઃ સતતમઙ્ગનામભિલષન્તિ રમ્યા યદિ ।
સ્વમાતૃભવનસ્થિતા પરજનેન સા નિન્દ્યતે
સુખં ખલુ કુતઃ સ્ત્રિયાઃ ક્વ ભુવિ લૌકિકં ચા મૃતેઃ ॥ ૪૧॥

મુરારિપદપઙ્કજપ્રવણહસ્તિરાજોઽપિ કિં
સુખી પરમભૂત્ પુરા કુજનિનક્રવક્ત્રાહૃતઃ ।
ક્ષિતીશવરવાહનસ્ય કરિણસ્તુ કા વા કથા
નિષાદિદૃઢશ‍ૃઙ્ખલાઙ્કુશનિયન્ત્રણાદ્ બન્ધનાત્ ॥ ૪૨॥

સુખં શતમખાશ્રયેઽપ્યહહ દભ્રમપ્યન્તતો
ન ચાભ્રમુપતેઃ સ્વતશ્ચરણરોધનાદ્ બન્ધનાત્ ।
પુરન્દરમનોનુગાં કલયતો ગતિં ચોત્તમાં

મુનિપ્રવરશાપતો વસુમતીગજત્વાન્વયાત્ ॥ ૪૩॥

પયોધિમથનોદ્ભવઃ સુરપતિપ્રિયોચ્ચૈઃશ્રવાઃ
સદા સુરરણાઙ્ગણભ્રમણધર્મલાલામુખઃ ।
ભવત્યપરસૈન્ધવો નરપતેઃ કથં પ્રાપ્નુયાત્
સુખં શકટકર્ષણાત્ કુશલસાદિપાદાહતેઃ ॥ ૪૪॥

જિતો હરિરિતીહ પક્ષિપતિરાપ દર્પં તતો
હરેઃ કિલ વરાર્થિનઃ પ્રવરપત્રતામાવહત્ ।
સુખં ન પતગેશિતુશ્ચ પરપક્ષિણઃ સ્યાત્ કથં
કિરાતજનભોજનસ્ય તરુકોટરાવાસિનઃ ॥ ૪૫॥

ત્રિમૂર્તિતનુરૂપકસ્તરુશિરોમણિઃ પુણ્યભાક્
પ્રજાવિવિધકામનાસતતપૂરણાયાસ્તધીઃ ।
સુખી ભવતિ કિં તતોઽપરતરુઃ કથં પ્રાપ્નુયાત્
સુખં ભવનપુત્તલીપરિકરાદિહેતુઃ પરમ્ ॥ ૪૬॥

સદા ત્રિપથગામિની પરમપાવની સાપ્યહો
સુખં ન લભતે નૃણાં દુરિતવર્ગસઙ્ક્ષાલનાત્ ।
તનૂમલપરિક્ષયાચ્છિવકપર્દસંરોધના-
ન્નદી વિપિનગામિની કિમયતે સુખં જાડ્યભાક્ ॥ ૪૭॥

સુખં કિમુ સરિત્પતેશ્ચુલુકનાન્મુનેર્મન્થના-
દહીન્દ્રતનુરજ્જુના સતતબાડબગ્રાસતઃ ।
રવુપ્રવરબન્ધનાન્નિયતમાકુલીભાવતો
નિજે હિ ભવને સદા સ્વતનુજાપતેર્વાસનાત્ ॥ ૪૮॥

સમુદ્રજલપાનતો ગગનમાર્ગસઞ્ચારતઃ
પ્રચણ્ડપવનાહતેરશનિતાડનાદ્ વજ્રિણઃ ।
અકાલનિજકાલયોરપિ ચ ભૂતલે વર્ષણાત્
કુતો જડમયસ્ય હા ભવતિ ધૂમયોનેઃ સુખમ્ ॥ ૪૯॥

વનસ્પતિપતિઃ સ્વયં સ ખલુ રાજયક્ષ્માકુલઃ
સુધાકરશરીરભૃદ્ ભવતિ રાહુણા પીડિતઃ ।
મલિમ્લુચસરોરુહપ્રવરકામુકદ્વેષિણો
વિચિત્રમમરત્વમેતદવલોકયેન્દોઃ પરમ્ ॥ ૫૦॥

મહેશ્વરભયાદ્ રવિર્ભ્રમતિ કાઞ્ચનાદ્રિં સદા
    પ્રજાઘશુભકર્મણાં ભવતિ કિં ચ સાક્ષી ભૃશમ્ ।
વિહીનદશનાનનશ્ચરુહવિઃ સમશ્નાત્યહો
    કુતોઽસ્ય સુખમાત્મનઃ પરમનૂરુમત્સારથેઃ ॥ ૫૧॥

શુભાશુભમખે હુતં વહતિ ભૂસુરૈરાનને
    તદર્પયતિ હવ્યવાડ્ યજનદેવતાભ્યો હવિઃ ।
પચત્યપિ ચ ષડ્ રસાન્ નૃજઠરે તથા મન્દિરે
    કુતોઽસ્ય સુખમસ્તિ હા નિયતદીપભાવાન્નિશિ ॥ ૫૨॥

સહસ્રભગવાન્ હરિઃ કથમસૌ સુખં પ્રમુત્રા-
    ન્ન ચૈકસુભગાન્વિતોઽપિ ચ નરસ્ત્રિલોકે સુખી ।
શરીરચરુયાજિનાં રણધનઞ્જયે પ્રીતયે
    સ્વભોજ્યગણિકાઙ્ગનાવ્રજનિયોજકશ્ચાનિશમ્ ॥ ૫૩॥

સુખી ભવતિ કિં વિધિર્વિવિધસૃષ્ટિસઙ્કલ્પવાન્
    જિતેન્દ્રિયયતીશ્વરાદરણચિત્તવૃત્તિઃ સદા ।
સ્વપૂર્વચતુરાનનપ્રચુરમુણ્ડમાલ્યં પરં
    મહેશગલમણ્ડનં મનસિ ચિન્તયન્ બુદ્ધિમાન્ ॥ ૫૪॥

સુખી કથમધોક્ષજો રઘુકુલાવતંસઃ પરં
    દશાનનવધોત્સુકો નરહરિર્મહાવામનઃ ।
ફણીન્દ્રશયનઃ પયોનિધિનિકેતનઃ શ્રીપતિ-
    ર્ધરાધરધરઃ પુમાન્ બહુલવેષધારી યથા ॥ ૫૫॥

મહાપિતૃવનાલયો નરકરોટિમાલાધરઃ
    પિશાચગણસંવૃતઃ કરટિચર્મવાસોધરઃ ।
ચિતાભસિતલેપનો વિષધરેન્દ્રભૂષો હરો
    વિરૂપનયનઃ સુખી ભવતિ કિં ચ ભિક્ષાટનઃ ॥ ૫૬॥

વિધિપ્રમુખદૈવતૈર્મનસિ કાઙ્ક્ષણીયં મુહુ-
    ર્નિદાનમમૃતસ્ય યત્ સકલદેવતાંશાત્મકમ્ ।
નૃજન્મ ભુવિ દેહિનાં પરમદુર્લભં હાટકં
    કરોતિ કુમતિર્વૃથા ભુવિ યથા હ્યપાત્રે વ્યધાત્ ॥ ૫૭॥

દ્વિજત્વમપિ દુર્લભં વરકુલોદ્ભવત્વં નૃણાં
    ત્રયીવિહિતકર્મકૃત્ત્વમપિ શામ્ભવત્વં તતઃ ।

વિશુદ્ધમતિસઙ્ગમો વિમલબુદ્ધિમત્ત્વં પરં
    ત્વિદં ભવતિ યસ્ય વૈ સુકૃતશાલિનાં સોઽગ્રણીઃ ॥ ૫૮॥

ગતં ન લભતે જનઃ ક્ષણલવાંશમપ્યાયુષઃ
    સદા વિષયવાસનાક્ષપિતકાલવૃત્તેર્બત ।
લભેત સિકતાગતં જલમપિ પ્રયત્નાન્ન તત્
    તતઃ કુરુ તદૈશ્વરં સફલમાત્મસંયોજનાત્ ॥ ૫૯॥

નર સ્મર ન તાં વૃથા વિષલતામિમાં સુન્દરીં
    સ્તનદ્વયસુમઞ્જરીમધુરપલ્લવાં મોહિનીમ્ ।
ભવજ્વરવિકારદામસહનીયતૃષ્ણાવહાં
    સ્ત્રિયઃ ખલુ વિચિન્તભાદપિ વિમોહયન્ત્યદ્ભુતમ્ ॥ ૬૦॥

અસત્યનિલયં પરં દુરિતકૃષ્ણ વર્મેન્ધનં
    પરાર્તિકરણક્ષમં પરુષમોહગર્વાલયમ્ ।
અચઞ્ચલસુધીમનઃકુલગિરીન્દ્રવજ્રાયુધં
    કથં હિ રમણીજનં કમલસમ્ભવોઽજીજનત્ ॥ ૬૧॥

વશીકરણમન્ત્રમદ્ભુતમપારવીર્યં સ્મરઃ
    પ્રયોગકુશલઃ સ્વયં ખલુ જપન્ સદા ત્ર્યક્ષરમ્ ।
પ્રસિદ્ધમબલેતિ તં ત્રિભુવનસ્થજન્તુષ્વસૌ
    કરોતિ સફલં તતઃ સ્મરહરેતિ મન્ત્રં જપ ॥ ૬૨॥

ગતાનુગતિકા જના ધ્રુવમિમે જગત્યાં સુધી-
    ર્ન કોઽપિ સુવિચારવાન્ યદબલેતિ મત્તાઃ સ્ત્રિયઃ ।
વિચિત્રમિહ તા બલપ્રકૃતિધર્મતેજસ્તપો-
    ધનાન્યપહરન્તિ યાઃ સ્મરણમાત્રતો જાગ્રતિ ॥ ૬૩॥

સુતેન સુગતિઃ પિતુઃ સ્મૃતિગિરેરિતેતિ ધ્રુવં
    તથૈવ તપસા ગતિર્ન ખલુ પુત્રહીનસ્ય કિમ્ ।
તદર્થમબલાનલે બહુધનેન્ધનપ્રોજ્જ્વલે
    પતઙ્ગ ઇવ દીપકે પતતિ સત્તપોબાધકે ॥ ૬૪॥

વૃથા બહુધનવ્યયૈર્વ્રજપૈઃ પ્રજોત્પાદનં
    કરોતિ વિબુધોઽપિ કિં જગતિ ધર્મપત્ન્યા મુદા ।
સ ચેત્ કુચરિતો ભવેદ્ ભવતિ પુણ્યલોકસ્થિતેઃ
    પિતુઃ પતનકારણં પ્રકટમૈહિકે ચાયશઃ ॥ ૬૫।

પિતા ભવતિ રેતસા સ્વયમિહૈવ પુત્રાત્મના
 ત્રયી વદતિ તત્તથા વિદિતમેતદત્યદ્ભુતમ્ ।
સ્વકર્મપરિપાકતો ભવતિ જન્મ ચેતિ શ્રુતં
 શ્રુતેર્હિ વચનં તદર્થમવબુધ્યતે નો જડઃ ॥ ૬૬॥

અજસ્ય પરમાત્મનો ન ખલુ શુક્લમાહારજં
 પિતૃત્વમિવ વન્ધ્યપુંસ ઇહ નૈવ સમ્ભાવિતમ્ ।
અલિઙ્ગસુખચિત્તનોઃ પરિણતિશ્ચ નો કર્મજા
 સદાદ્વયસદાત્મનઃ શ્રુતિવિધિશ્ચ કોઽપ્યસ્તિ નો ॥ ૬૭॥

ધનં સ્વસુખકારણં નિમિષશસ્તથા લેશશો
 નરેણ બહુવિદ્યયા પરમમાર્જન ભુવિ ।
ન નીતિવચનં હિ તત્ ખલુ જડં સુખસ્યાત્મનઃ
 કથં ભવતિ કારણં ભુવિ વિચારવાન્ કોઽપિ ન ॥ ૬૮॥

ધનં મદવિવર્ધનં પતિસતીમનોભેદનં
 કુનીતિજનભૂષણં નટનટીસમાકર્ણનમ્ ।
પ્રપઞ્ચતરુજીવનં પ્રણયતૈલસંશોષણં
 કથં હિ વિદુષેષ્યતે કુમતિભિઃ પ્રકોપો યથા ॥ ૬૯॥

"નિરન્તરસુખપ્રદં નિટિલલોચનં નિષ્કલં
 મમત્વપરિમોચનં મદનવૈરિણં તં પ્રભુમ્ ।
વિહાય વિબુધોઽપિ કિં વિભવસિદ્ધયે કુત્સિતં
 નરં નરકમાગિનં સતતમાશ્રયત્યાત્મહા ॥ ૭૦॥

ધનાર્જનપરો ભવ ત્વમિહ સર્વદા દુઃખધી-
 સ્તવાત્ર સુખમીષદસ્તિ કિમુ તદ્ધનેન ધ્રુવમ્ ।
સ્વપુત્રસુકલત્રમિત્રજનભોગયોગ્યં ભવેત્
 તદાર્જનસમુચ્ચયેષુ સરઘેવ કિં ક્લિશ્યસિ ॥ ૭૧॥

ત્રયીપઠનમાદરાત્ પિતૃતિથૌ હિ ભોક્તું દ્વિજઃ
 કરોતિ ગદિતું ક્વચિત્ સ્મૃતિવિમર્શનં સૂતકમ્ ।
મનૂઞ્જપતિ હિંસનાય પરમાર્થતો વેદવિ-
 ન્ન કશ્ચિદપિ પુણ્યધીર્ભુવિ વિચારવાનાત્મનિ ॥ ૭૨॥

ઇદં જગદસન્મહન્ન ખલુ કર્મ દેહઃ સતી
 ધનં નિધનમિન્દ્રજાલમિતિ સર્વમાત્મીયકમ્ ।

પરાનુપદિશન્ત્યહો શ્રુતિશિરાંસિ લોકે સ્વયં
ધનાર્જનપરાઃ સદા ધનિગૃહાશ્રિતાઃ પણ્ડિતાઃ ॥ ૭૩॥

કુતર્કપઠનોત્સુકાઃ કુસુમબાણશાસ્ત્રીયકાઃ
પ્રબન્ધકથનપ્રિયાઃ પ્રહસનપ્રશંસાકરાઃ ।
કલાકુશલબુદ્ધયઃ કલુષહૂણભાષારતા
ભવન્તિ ભુવિ ભૂસુરા નિગમસારચિત્ કોऽપિ ન ॥ ૭૪॥

ધનાર્જનપરો ભવાન્ ભવતિ યાવદેવ પ્રિયા-
કુમારપિતૃસોદરીદુહિતૃમાતૃબન્ધુસ્નુષાઃ ।
ભવન્તિ વિનયાન્વિતાઃ પરિસરન્તિ ભક્ત્યા પરં
યદા ભવતિ નિર્ધનો જગતિ તે હિ કુપ્યન્તિ ચ ॥ ૭૫॥

ન કોऽપિ ચ સહાયકો ભવતિ તત્ર વર્ત્મન્યહો
જનો બહુદયાપરાસ્ત્વયિ હિ યે શ્મશાનાવધિ ।
ધનાર્થમનુયાન્તિ કેચન બુધા મુધા તજ્જને
કરોષિ સતતં પ્રિયં ત્યજ મમત્વપાશં તતઃ ॥ ૭૬॥

પલાલમિહ ધાન્યધીસ્ત્યજતિ લોકશાસ્ત્રશ્રુતી-
સ્તથા ત્વમપિ મોક્ષધીસ્ત્વરિતમેવ તં સ્વીકુરુ ।
ચરાચરમયં રસં ગુરુકટાક્ષસંસ્પર્શનાત્
પયોऽપિ જલમિશ્રિતં કલયતીહ હંસો યથા ॥ ૭૭॥

ઇમામશુચિકુણ્ડિકાં જડમયીં તનું શ્યામલાં
રસાર્તવસુમૃન્મયીં પિતૃકુલાલસત્કારણામ્ ।
યતીન્દ્રનવરન્ધ્રિકાં સુભગચક્રસમ્ભૂતિકાં
ન તાં સ્પૃશ મનોરથશ્વપચદૂષિતાં સર્વથા ॥ ૭૮॥

અહો પરમદુઃખદો જગતિ કોऽસ્તિ દેહાત્ પૃથક્
પરોપકૃતિવૃત્તિવિસ્મૃતિપરશ્ચ દોષાકરઃ ।
પરાર્તિનયનોત્સવઃ પરધનક્ષયૌત્સુક્યધી-
સ્તપોજનપરાઙ્મુખસ્તરલતાકરઃ સન્મતેઃ ॥ ૭૯॥

ગજાબ્જવરચિત્રકાયકિરિગોમૃગાણાં યથા
ત્વગસ્થિનખરોમરોચનવરાણિ ગૌરીપતેઃ ।
સમર્પણવિભૂષણોપકરણાનિ જન્તોસ્તથા
તવાઙ્ગમશિવાર્પણં ભવતિ કિં ન ભૂભારકૃત્ ॥ ૮૦॥

ભનોનૃપતિમઞ્જસા જહિ વિવેકખડ્ગેન તં
    મહેશ્વરપરાઙ્મુખં વિષયપઞ્ચમન્ત્ર્યન્વિતમ્ ।
શિવાઙ્ઘ્રિકમલાર્ચનાનિયતકામયાનસ્થિત-
    સ્તતો હ્યમૃતસુન્દરી પ્રવૃણુયાદ્ભવન્તં સુધીઃ ॥ ૮૧॥

મનોદશમુખાસુરં ભવસમુદ્રમધ્યોલ્લસ-
    ચ્છરીરપુરવાસિનં વિમલબુદ્ધિસીતામુષમ્ ।
જહિ ત્વમભિરામધીઃ પ્રણવચાપચન્દ્રેષુણા
    વિદેહકુલદીપિકાં પ્રલભસે પુનઃ સત્વરમ્ ॥ ૮૨॥

મનોન્મનિ જહિ દ્રુતં હૃદયચણ્ડભણ્ડાસુરં
    પરાત્પ્રકૃતિમણ્ડિતં પરમશામ્ભવીભાસિતે ।
મહેન્દ્રધનુષા ત્વિષા મદનવૈરિનેત્રાગ્નિના
    સુખા મૃતતરઙ્ગિણી ભવસિ તેન સંરાઙ્ગિકા ॥ ૮૩॥

ગુરૂક્તિસુધયૈવ હૃત્ સમલમાપ્લુયાચ્છુદ્ધતાં
    તદા તવ હિ મોક્ષધોહૃદયપુણ્ડરીકામ્બરે ।
અખણ્ડમમૃતં શિવં શશિકલાવતંસં સુખં
    તતસ્ત્વમિહ પશ્યસિ પ્રણતલોકકલ્પદ્રુમમ્ ॥ ૮૪॥

કૃપાબ્ધિવડવાનલં સુકૃતશૈલવજ્રાયુધં
    વિમર્શસુમમઞ્જરીવનહુતાશનં નાશ્રય ।
સુમૈત્રઘનમારુતં સુમતિપદ્મિનીહસ્તિનીં
    ક્રુધં વરતપોડશનિં ચિતિશશાઙ્કરાહું નર ॥ ૮૫॥

સ્પૃહા શુનકબાલિકેતિ હિ વદામિ ભોજ્યે તુ સા
    સ્વવાન્તમનઘા ચ નાતિપરિપાલિતાન્નં ભયાત્ ।
ન ગચ્છતિ ધરાન્તરં તત ઇતઃ ક્ષણં ધાવતિ
    બ્રવીમિ કિમહો સુધીર્જગતિ નાસ્તિ તૃષ્ણોપમા ॥ ૮૬॥

મનોરથપિશાચિકા સકલધાતુસંશોષિકા
    કુદેશગમનોત્સુકા ગલિન્તભીતિદુર્વૃત્તિકા ।
સદા ચપલચિત્તદા સ્મરણમાત્રતો નશ્યતિ
    ધ્રુવં શિવપદાબ્જભક્તિરસતૃપ્તિસેતોર્ભુવિ ॥ ૮૭॥

ત્વમેવ પરમઃ શિવસ્ત્વયિ હિ જાતમેતજ્જગત્

    ત્વયિ પ્રરમતે પુનસ્ત્વયિ વિલીયતે સત્તયા ।
ત્વમેવ સકલં જગજ્જલનિધૌ તરઙ્ગાદિવત્
    ત્વમેવ પરમોક્તિવાનહમપીતિ ન ત્વાં વિના ॥ ૮૮॥

ઇમાં પરમપાવનીં હૃદિ વિરક્તિરત્નાવલિં
    સદા વહતિ યો નરઃ સ તુ વિવેકચૂડામણિઃ ।
ભજત્યમલબુદ્ધિષુ પ્રવરતામપિ શ્રીપુરે -
    શ્વરસ્ય કૃપયામૃતં પ્રલભતામનન્તં શિવમ્ ॥ ૮૯॥

ઇતિ શ્રીવિરક્તિરત્નાવલિઃ સમાપ્તા ।

(૩૮)

Proofread by Sivakumar Thyagarajan Iyer

---

*Virakti Ratnavali*

pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*